# Narakoddhara Stotram

# नरकोद्धारस्तोत्रम्

## Document Information

Text title : Narakoddhara Stotram

File name : narakoddhArastotram.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# नरकोद्धारस्तोत्रम्

दारिद्र्यपङ्कसम्मग्नं संसाराख्यमहोदधौ ।
प्रतिज्ञातं समुत्पादे त्राहि मां हि तथागत ॥ १॥

तिमिरागारसंविष्टमनर्थदुःखवेदिनम् ।
बन्धुवर्गैः परित्यक्तं त्राहि मां हि तथागत ॥ २॥

मातापितृभगिन्यादि पुत्रदारसुहृज्जनाः ।
इन्द्रजालसमा दृष्टास्त्राहि मां हि तथागत ॥ ३॥

मया अरिजनस्यार्थे सुकृतं कर्म दुष्कृतम् ।
एकाकी तं हि भोक्ष्यामि त्राहि मां हि तथागत ॥ ४॥

जीर्णकूपे महाघोरे अनवगाहसागरे ।
अन्धीभूतोऽस्म्यहं नाथ त्राहि मां हि तथागत ॥ ५॥

जीर्णनौइकासमारूढो महासागरलङ्घने ।
दुर्लङ्घ्यं च मया दृष्टं त्राहि मां हि तथागत ॥ ६॥

धर्माधर्मं न विज्ञातं गम्यागम्यं न वेदितम् ।
अचेतनोऽस्म्यहं नाथ त्राहि मां हि तथागत ॥ ७॥

मातृघातादिकं पञ्चानन्तर्यं वा मया कृतम् ।
पच्यामि नरके घोरे त्राहि मां हि तथागत ॥ ८॥

कृतं मया स्तूपभेदं सङ्घकार्यं विनाशितम् ।
कृता मया सत्त्वहिंसा त्राहि मां हि तथागत ॥ ९॥

इहलोके सुखैर्हीनं परलोके न वेदनम् ।
वेष्टितं कर्मसूत्रेण त्राहि मां हि तथागत ॥ १०॥

काशपुष्पं यथाकाशे भ्रमते वायुना हतम् ।
ईदृशं जीवितं लोके त्राहि मां हि तथागत ॥ ११॥

अटवी कण्टकाच्छन्ना बहुवृक्षसमाकुला ।
पन्थानं नात्र पश्यामि त्राहि मां हि तथागत ॥ १२॥

अनपराधाः कुपितेन मयाऽकाण्डे हता मृगाः ।
राजहत्यां तदा मन्ये त्राहि मां हि तथागत ॥ १३॥

नरके पच्यमानस्य कश्चित् त्राता भविष्यति ।
गच्छामि शरणं कस्य त्राहि मां हि तथागत ॥ १४॥

वैद्यानां वैद्यराजस्त्वं सर्वव्याधिचिकित्सकः ।
लोकनाथ भवत्राता त्रैलोक्ये सचराचरे ॥ १५॥

इति नरकोद्धारस्तोत्रं सम्पूर्णम् ॥

*Narakoddhara Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*